# ॥ રાધાયાઃ પરિહારસ્તોત્રમ્ (બ્રહ્મવૈવર્તપુરાણાન્તર્ગતમ્) ॥

.. shrI rAdhAyAH parihArastotram ..

sanskritdocuments.org

August 20, 2017

# .. shrI rAdhAyAH parihArastotram ..

# ॥ રાધાયાઃ પરિહારસ્તોત્રમ્ (બ્રહ્મવૈવર્તપુરાણાન્તર્ગતમ્) ॥

## Sanskrit Document Information

Text title : shrI rAdhAyAH parihArastotram

File name : rAdhAparIhAra.txt

Category : devii, radha, stotra

Location : doc_devii

Author : uddhava

Language : Sanskrit

Subject : hinduism/religion

Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Proofread by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)

Description-comments : brahmavaivarta purANa

Latest update : August 13 2017, June 26, 2002

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીરાધાયાઃ પરિહારસ્તોત્રમ્ ॥

ત્વં દેવી જગતાં માતા વિષ્ણુમાયા સનાતની ।
કૃષ્ણપ્રાણાધિદેવિ ચ કૃષ્ણપ્રાણાધિકા શુભા ॥ ૧॥

કૃષ્ણપ્રેમમયી  શક્તિઃ કૃષ્ણસૌભાગ્યરૂપિણી ।
કૃષ્ણભક્તિપ્રદે રાધે નમસ્તે મઙ્ગલપ્રદે ॥ ૨॥

અદ્ય મે સફલં જન્મ જીવનં સાર્થકં મમ ।
પૂજિતાસિ મયા સા ચ યા શ્રીકૃષ્ણેન્ પૂજિતા ॥ ૩॥

કૃષ્ણવક્ષસિ યા રાધા સર્વસૌભાગ્યસંયુતા ।
રાસે રાસેશ્વરીરૂપા વૃન્દા વૃન્દાવને વને ॥ ૪॥

કૃષ્ણપ્રિયા ચ ગોલોકે તુલસી કાનને તુયા ।
ચમ્પાવતી કૃષ્ણસંગે ક્રીડા ચમ્પકકાનને ॥ ૫॥

ચન્દ્રાક્લી ચન્દ્રવને શતશ્રિઙ્ગે સતીતિ ચ ।
વિરજાદર્પહન્ત્રિ ચ વિરજાતટકાનને ॥ ૬॥

પદ્માવતી પદ્મવને કૃષ્ણા કૃષ્ણસરોવરે ।
ભદ્રા કુઞ્જકુટીરે ચ કામ્યા ચ કામ્યકે વને ॥ ૭॥

વૈકુણ્ઠે ચ મહાલક્ષ્મીર્વાણી નારાયણોરસિ ।
ક્ષીરોદે સિન્ધુકન્યા ચ મર્ત્યે લક્ષ્મીર્હરિપ્રિયા ॥ ૮॥

સર્વસ્વર્ગે સ્વર્ગલક્ષ્મીર્દેવદુઃખવિનાશિની ।
સનાતની વિષ્ણુમાયા દુર્ગા શંકરવક્ષસિ ॥ ૯॥

સાવિત્રી વે! દમાતા ચ કલયા બ્રહ્મવક્ષસિ ।
કલયા ધર્મપત્ની ત્વં નરનારાયણપ્રસૂઃ ॥ ૧૦॥

કલયા તુલસી ત્વં ચ ગઙ્ગા ભુવનપાવની ।
લોમકૂપોદ્ભવા ગોપ્યઃ કલાંશા હરિપ્રિયા ॥ ૧૧ ॥

કલાકલાંશરૂપા ચ શતરૂપા શચિ દિતિઃ।
અદિતિર્દેવ્માતા ચ ત્વત્કલાંશા હરિપ્રિયા ॥ ૧૨॥

દેવ્યશ્ચ મુનિપત્ન્યશ્ચ્જ ત્વત્કલાકલયા શુભે ।
કૃષ્ણભક્તિં કૃષ્ણદાસ્યં દેહિ મે કૃષ્ણપૂજિતે॥ ૧૩॥

એવં કૃત્વા પરીહારં સ્તુત્વા ચ કવચં પઠેત્ ।
પુરા કૃતં સ્તોત્રમેતદ્ ભક્તિદાસ્યપ્રદં શુભમ્ ॥ ૧૪॥

॥ ઇતિ શ્રી બ્રહ્મવૈવર્તે શ્રીરાધાયાઃ
પરિહારસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

.. shrI rAdhAyAH parihArastotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*